International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 76-78
© 2026 IJMH
www.themultijournal.com
Received: 11-03-2026
Accepted: 23-03-2026
Publish : 24-03-2026

**लक्ष्मीश्री बेहेरा**
शोधछात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**लक्ष्मीश्री बेहेरा**
शोधछात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# नवेक्षिका-गीतिकाव्ये सामाजिकतायाः एकम्-अध्ययनम्

**लक्ष्मीश्री बेहेरा**

**प्रस्तावना-**

संस्कृतसाहित्ये गीतिकाव्यपरम्परा अत्यन्तं समृद्धा दृश्यते। गीतिकाव्येषु कवयः स्वानुभूतिं, भावनां, समाजस्य विविधस्थितिं च सूक्ष्मतया निरूपयन्ति। एतेषु काव्येषु केवलं काव्यसौन्दर्यमेव न, अपितु तत्र समाजस्य जीवनपद्धतिः, आचार-विचाराः, सांस्कृतिकमूल्यानि चापि प्रतिबिम्बितानि दृश्यन्ते। एतादृशेषु काव्येषु नवेक्षिका-गीतिकाव्यं विशेषमहत्त्वं वहति। अस्मिन् काव्ये कविः सामाजिकजीवनस्य विविधपक्षाः अत्यन्तं भावपूर्णया चित्रयति ।

नवेक्षिका-गीतिकाव्ये सामाजिकतायाः निरूपणं अत्यन्तं प्रभावपूर्णं दृश्यते। कविः समाजस्य यथार्थस्थितिं स्वकाव्ये प्रकटयति। मानवजीवनस्य सुखदुःखानि,परस्परसम्बन्धाः, सामाजिकव्यवहाराः, तथा च मानवीयमूल्यानि अस्मिन् काव्ये प्रतिफलन्ति। एतेन काव्येन ज्ञायते यत् समाजः केवलं व्यक्तिसमूहः न, अपितु परस्परं सहानुभूत्या, प्रेम्णा, सहयोगेन च सम्बद्धं जीवनतन्त्रम् अस्ति।

अस्मिन् काव्ये पारिवारिकजीवनस्य अपि सुन्दरं चित्रणं दृश्यते। परिवारः समाजस्य मूलाधारः इति भारतीयसंस्कृतेः प्रमुखः सिद्धान्तः अस्ति। कविः पारिवारिकसम्बन्धानां माधुर्यं, स्नेहभावं, परस्परकर्तव्यपालनं च अत्यन्तं हृद्यतया निरूपयति। एतत् सामाजिकजीवनस्य स्थैर्यं तथा सुसंवादं दर्शयति । तथैव नारीणां स्थानम् अपि अस्मिन् काव्ये उल्लेखनीयम् अस्ति। नारी समाजस्य आधारशक्ति इति भावना कविना प्रकटिता। नारीणां कोमलभावनाः, तेषां त्यागः, स्नेहः, करुणा च अत्यन्तं मार्मिकरीत्या निरूपिताः सन्ति। एतेन भारतीयसमाजे नारीणां महत्त्वं स्पष्टतया प्रतिपादितं भवति।

नवेक्षिका-गीतिकाव्ये प्रकृतिचित्रणम् अपि सामाजिकजीवनस्य सहचररूपेण दृश्यते। प्रकृत्या सह मानवजीवनस्य घनिष्ठसम्बन्धः अस्ति। कविः प्रकृतिसौन्दर्यस्य वर्णनं कृत्वा मानवजीवनस्य भावान् अधिकं प्रभावकरं करोति। अनेन काव्ये समाजः, प्रकृतिः, मानवभावनाः च परस्परं सम्बद्धाः इव दृश्यन्ते।

**नवेक्षिकाकाव्यस्य संक्षिप्त परिचयः –**

साहित्यं समाजस्य दर्पणः। एतदेव समर्थयता समाजे याः घटना दृश्यन्ते, याः संवेदनाः अनुभूयन्ते, या प्रवृत्तयः प्रवर्तन्ते, विसङ्गतयो विवर्धन्ते, तत् सर्वं कविहृदये जायमानं भावसंस्फुरणं भावोच्छलनं सत् गीतिकाव्यरूपं धारयति। नैसर्गिकरूपेण नवेक्षिकाकाव्यस्य कविः हरिदत्तशर्मा लिखति मदीये मनसि समुद्भूतं भावजालकं राग-लय-लालितेन, सरस-सङ्गीत-सङ्गुम्फितेन गीतिरूपेणैव प्रकाशमायाति । नव-नव-भाव-भावितं, सङ्गीत-राग-नादितं, नवच्छन्दोविधान-प्रणीतं, नवयुग-परिवेश-परीतं, नवगीतं कृतेरस्या मूलतत्त्वम्। साम्प्रतिककालः संस्कृत-नवगीत-विधायाः स्वर्णकालः। इयं गीतमालिका कदाचित् कवेरात्मगुञ्जनपरिणामरूपेण, कदाचित् लोकगीत-लयानुकरणरूपेण, कदाचिच्च गजल-गीत-भाव-शिल्पाङ्गी-करणरूपेण तरुणी रमणीव नवनवानि रूपाण्यदधाना दृश्यते।

आधुनिककाले परमसमृद्धिसम्पन्नेऽपि सति संस्कृतकाव्ये नैके जना अज्ञतया, अल्पज्ञतया, दुराग्रहवशाद् वा संस्कृतकाव्यस्य आधुनिकत्वं समसामयिकत्वञ्च नाङ्गीकुर्वन्ति। परन्तु यथार्थं त्विदमेव यदन्य-भारतीयभाषाणां साहित्यमिव संस्कृत-साहित्यमपि समकालिक-युग-संवेदनानुरूपमेव रच्यते।

आधुनिककाले राष्ट्रियस्तरे समाजे या अपि विसङ्गतयः कुप्रवृत्तयो वा प्रवर्तन्ते, अन्ताराष्ट्रिये स्तरे या अपि युद्धविभीषिका आतङ्क-भुशुण्डिका वा प्रचलन्ति, ताः सर्वा अपि विषयीकृत्य लिखति संस्कृतकविः। यायावररूपेण सर्वत्र समाजे पर्यटता मया चर्मचक्षुषा यद् दरीदृश्यते, तदेव संवेदनशीले ममान्तहृदये प्रविश्य नरीनृत्यते, कवितारूपञ्च धत्ते । यद् दृश्यते तत् कदाचित् रमणीयं, कुसुमकोमलं, हृदयाह्लादकञ्च भवति, कदाचिच्च बीभत्सं, वज्रकर्कशं, हृदयक्लेशदञ्च भवति। परं कविकर्मणा स्पृष्टं सत् सर्वं रसभावमयं काव्यं जायते।

अतः याथार्थ्ययुतं हि काव्यस्यास्य नामधेयं 'नवेक्षिका' इति। कवेर्नवीना ईक्षिका - नवा दृष्टिः- भद्रं तथाऽभद्रं, सत् तथाऽसत् सर्वं पश्यति-

**भद्रं तथाऽभद्रं च सदसत् पश्यतीह नवेक्षिका।**
**नवयुगे नव्यविसङ्गतीः पश्यति ममैव नवेक्षिका ।।**

नूनमेवास्य संस्कृतकवेः नवा दृष्टिः नवेऽस्मिन् युगे काव्यक्षेत्रे नवतामादधाना नव-नवा उद्भावना उद्भाव्य नूतनाः परिकल्पनाः परिकल्प्य, साहित्यसंसारे समुज्जृम्भताम् इति शम्।

**कविपरिचयः-**

अभिनवसंस्कृतविद्वत्सु से केचन अङ्गुलीगणनीयाः मूर्द्धन्यभूताः वर्तन्ते तेषु आचार्यहरिदत्तशर्ममहोदयः सुपरिचितः । अष्टाचत्वा-रिंशदधिक एकोनविंशतितम शतके सेप्टेम्वरमासस्य सप्तविंशतितमे दिनाङ्के (27/09/1948) तमे उत्तरप्रदेशस्य हाथरस इत्यस्मिन् स्थाने जन्म प्राप्तुवन्। सुरभारत्याः समुपासकाः इमे अलङ्कारशास्त्रे अनेकविधं कार्यं कृत्वा विश्वे प्रसिध्दिं प्राप्तवन्तः । हरिद-त्तशर्ममहोदयस्थ अनेकविधग्रन्थरत्नेषु "नवेक्षिका" इति गीतिकाव्यं विदुषां मनः सर्वथा प्रमोदयति । नवेक्षिका " पञ्चचत्वारिंशत् संख्याकानां गीतानां समाहारेणसाहित्यश्रीविवर्धनतत्परा गीतिका-व्यकुसुमाञ्जलिः ।

कविःनवेक्षिका इति काव्ये '**हापिष्टा जनता** 'इति पद्ये लिखति-

**विविधरङ्गरञ्जितजम्बुकवत् सन्ति हि नेतारः।**
**राजनीतिसृतिषु क्रीडन्तो होलीं क्रोष्टारः ।।**
**जन-गण-धन-लुण्टनं केवलं धर्मकर्म जातम्**
**जनता.............**

नवेक्षिका /२८

**कामाचारविलिप्ते मन्त्रिणि भ्रष्टाचारपरे।**
**राजा कालकारणं भणितिश्चरितार्थाऽद्य नु रे।।**
**जनताऽन्यायगहनतां सहते तत्कृतमतिपातम्**
**जनता................**

नवेक्षिका /२९

अर्थात्,अस्मिन् पद्ये कविना वर्तमानसमाजस्य तथा राजनैतिकस्थितेः यथार्थचित्रणं कृतम्। कविः दर्शयति यत् सर्वत्र दुष्टशासनस्य प्रभावः वर्तते, येन सामान्यजनता अत्यन्तं कष्टं सहते। नेतारः स्वार्थसिद्ध्यर्थं विविधप्रकारेण छलकपटेन जनान् मोहितवन्तः, किन्तु तेषां कर्मसु नीतिः, लज्जा, सदाचारश्च न दृश्यन्ते।राजनीतौ केवलं धनलुण्ठनम्, स्वार्थसाधनं तथा भ्रष्टाचारः प्रवर्तते। नेतारः जनविश्वासं लब्ध्वा शपथं कुर्वन्ति,परन्तुपश्चात् तस्य पालनं न कुर्वन्ति। विधायकाः तथा अधिकारिणः अपि स्वकर्तव्यं विस्मृत्य स्वार्थपरायणाः भवन्ति, येन समाजे नैतिकमूल्यानां पतनंदृश्यते।सरकारनिर्माणप्रक्रियायामपि पक्षविपक्षयोः कलहः, आरोप-प्रत्यारोपाः च दृश्यन्ते, येन देशस्य उन्नतिः बाध्यते। मन्त्रीणां तथा कर्मचारिणां भ्रष्टाचारकारणात् जनसेवा यथावत् न सम्भवति। अस्य सर्वस्य परिणामरूपेण साधारणजनता एव दुःखं सहते तथा तस्य जीवनं क्लेशपूर्णं भवति।

अतः कविः अस्मिन् काव्ये समाजे व्याप्तस्य अनाचारस्य, भ्रष्टाचारस्य, तथा राजनैतिकस्वार्थस्य तीव्रसमालोचनां कृत्वा जनजीवनस्य दुःखदस्थितिं प्रकाशयति।

पुनश्च,कविः '**किं किं नहि कुर्वन्ति रे ?**' इति पद्ये लिखति-

**लोकतन्त्रवृक्षेष्वधुना हा**
**विषफलानि विकसन्ति रे !**
**लोकहितं परिहाय नायकाः**
**किं किं न हि कुर्वन्ति रे !!**

नवेक्षिका /३४

**कार्यालयान् प्रविश्य प्रसह्य हि तेषां स्वेच्छाचरणम्।**
**गन्त्रीष्वारक्षणं विनैव बाहुबलेन प्रसरणम्।।**

नवेक्षिका /३५

**अपराधानां ततिः शिरसि येषां बहवस्त्वभियोगाः।**
**जननायका महान्तस्तेषामेव मन्त्रिपदभोगाः ।।**
**जनसेवाव्याजैर्नेतारो**
**बहुभोगान् भुञ्जन्ति रे**
**लोकहितं................**

नवेक्षिका /३६

अर्थात्, अस्मिन् पद्ये कविना लोकतन्त्रव्यवस्थायाः विकृतरूपं तीव्रतया चित्रितम्। कविः दर्शयति यत् ये नायकाः लोकहिताय नियुक्ताः भवन्ति, ते स्वार्थसिद्ध्यर्थं विविधप्रकाराणि अनुचितकर्माणि कुर्वन्ति। लोकतन्त्रे जनसेवा मुख्यलक्ष्यम् इति कथ्यते, किन्तु वस्तुतः नेतारः मिथ्याभाषणेन, वचनभङ्गेन तथा कपटेन जनान् मोहयन्ति।

संसदि तथा राजनैतिकव्यवस्थायां कलहः, परस्परदोषारोपणम्, अनाचारः च दृश्यते। मतप्राप्त्यर्थं नेतारः जनान् भ्रमयन्ति, धनवितरणं कुर्वन्ति, तथा विविधोपायैः जनानां मतानि आकर्षयन्ति। ते लोकहितस्य नाम्ना स्वकीयलाभमेव चिन्तयन्ति।

अपराधिनः अपि राजनैतिकसमर्थनेन उच्चपदानि प्राप्नुवन्ति, येन समाजे न्यायव्यवस्था दुर्बला भवति। नेतारः मधुरवचनैः जनान् आकर्षयन्ति, किन्तु वास्तविकतया जनसेवायाः प्रति तेषां रुचिः नास्ति।

एवं कविः अस्मिन् काव्ये आधुनिकराजनीतेः भ्रष्टाचारं, स्वार्थपरतां, तथा लोकतन्त्रस्य पतनस्थितिं आलोचयति । अन्ते स्पष्टं भवति यत् एते नेतारः लोकहितस्य नाम्ना "किं किं न हि कुर्वन्ति" – अर्थात् स्वार्थसिद्ध्यर्थं सर्वप्रकाराणि अनुचितकर्माणि कुर्वन्ति।

इतोपि, कविः '**लब्धा परन्तु प्रवञ्चना**'इति पद्ये लिखति –

**अनवरत-जीवनधावने**
**सोढा मया ह्यवहेलना !**
**न्यायाय याच्ञा तु विहिता**
**लब्धा परन्तु प्रवञ्चना !!**

नवेक्षिका /४८

**साऽऽतङ्कदुर्घटनाहता**
**बह्वीतिभीति-प्रपीडिता।**
**जनतया जनतन्त्रेऽर्ज्यते**
**दुश्चक्रपेषणयन्त्रणा**
**न्यायाय............**

नवेक्षिका /४९

अर्थात्, अस्मिन् पद्ये समाजस्य राजनैतिकजीवनस्य च स्थितिः वर्णिता अस्ति। जननायकाः स्वलाभार्थं मधुरवचनैः जनान् आकर्षयन्ति, परन्तु ते स्वप्रतिज्ञाः न पालयन्ति। जनाः तेषां वचनैः मोहिताः भवन्ति, किन्तु पश्चात् तेषां कर्मसु प्रवञ्चना, अन्यायः, शोषणं च दृश्यते। अतः कविः सूचयति यत् समाजे सत्यनिष्ठा, न्यायः तथा जनसेवा आवश्यकाः सन्ति, अन्यथा जनजीवनं क्लेशपूर्णं भवति।

**उपसंहारः-**

अतः निष्कर्षतः वक्तुं शक्यते यत् नवेक्षिका-गीतिकाव्यम् केवलं काव्यरचनामात्रं न, अपितु सामाजिकजीवनस्य दर्पणरूपेण अपि अस्ति। अस्मिन् काव्ये कविः वहु सामाजिकविषयाणां वर्णनं कृतवान्। कविना समाजस्य मूल्यव्यवस्था, पारिवारिकसम्बन्धाः, नारीस्थानम्, मानवीयभावनाः च अत्यन्तं सुन्दररीत्या निरूपिताः सन्ति। अतः अस्य काव्यस्य सामाजिकदृष्ट्या अध्ययनं साहित्य-शास्त्रदृष्ट्या अत्यन्तं महत्त्वपूर्णम् इति स्पष्टं भवति।

**उपयुक्तग्रन्थसूचीः –**

- संस्कृतसाहित्येतिहासः-किताव महल,कटक,२००८
-अमृतायनम् -राका प्रकाशन्,प्रयागराज,२००३
-नवेक्षिका(सुरगवी-नवगीत-मालिका),राका प्रकाशन्,इलाहाबाद,२०१४